# Skanda Veda Pada Stavah

# સ્કન્દવેદપાદસ્તવઃ

## Document Information

Text title : Skanda Vedapada Stavah

File name : skandavedapAdastavaH.itx

Category : subrahmanya

Location : doc_subrahmanya

Transliterated by : Mahaperiaval trust

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com, PSA Easwaran

Description-comments : from subrahmaNyastutimanjarI

Latest update : November 29, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 3, 2023

*sanskritdocuments.org*

# સ્કન્દવેદપાદસ્તવઃ

યો દેવાનાં પુરો દિત્સુરર્થિભ્યો વરમીપ્સિતમ્ ।
અગ્રે સ્થિતઃ સ વિઘ્નેશો મમાન્તર્હૃદયે સ્થિતઃ ॥ ૧॥

મહઃ પુરા વૈ બુધસૈન્ધવશ્રીશરાટવીમધ્યગતં હૃદન્તઃ ।
શ્રીકણ્ઠફાલેક્ષણજાતમીડે તત્પુષ્કરસ્યાયતનાદ્ધિ જાતમ્ ॥ ૨॥

મહો ગુહાખ્યં નિગમાન્તપઙ્ક્તિ મૃગ્યાઙ્ઘ્રિપઙ્કેરુહયુગ્મમીડે ।
સામ્બો વૃષસ્થઃ સુતદર્શનોત્કો યત્પર્યપશ્યત્સરિરસ્ય મધ્યે ॥ ૩॥

ત્વામેવ દેવં શિવભાલનેત્રમહોવિવર્તં પરમાત્મરૂપમ્ ।
તિષ્ઠન્ વ્રજન્ જાગ્રદહં શયાનઃ પ્રાણેન વાચા મનસા બિભર્મિ ॥ ૪॥

નમો ભવાનીતનુજાય તેઽસ્તુ વિજ્ઞાતતત્ત્વા મુનયઃ પુરાણાઃ ।
યમેવ શમ્ભું હરિમબ્જયોનિં યમિન્દ્રમાહુર્વરુણં યમાહુઃ ॥ ૫॥

કોટીરકોટિસ્થમહાર્ઘકોટિમણિપ્રભાજાલવૃતં ગુહં ત્વામ્ ।
અનન્યચેતાઃ પ્રણવાબ્જહંસં વેદાહમેતં પુરુષં મહાન્તમ્ ॥ ૬॥

સ નોઽવતુ સ્વાલિકપઙ્ક્તિજીવગ્રહં ગૃહીતાયતચન્દ્રખણ્ડઃ ।
ગુહાદસીયન્તમિદં સ્વરૂપં પરાત્પરં યન્મહતો મહાન્તમ્ ॥ ૭॥

સ્વર્ગાપગામધ્યગપુણ્ડરીકદલપ્રભાજૈત્રવિલોચનસ્ય ।
અક્ષ્ણાં સહસ્રેણ વિલોક્યમાનં ન સન્દૃશે તિષ્ઠતિ રૂપમસ્ય ॥ ૮॥

હેમદ્વિષત્કુણ્ડલમણ્ડલાઢ્યગણ્ડસ્થલીમણ્ડિતતુણ્ડશોભઃ ।
બ્રહ્મ ત્વમેવેતિ ગુહો મુનીન્દ્રૈઃ હૃદા મનીષા મનસાઽભિક્લૃપ્તઃ ॥ ૯॥

સુપક્વબિમ્બાધરકાન્તિ રક્તસન્ધ્યામૃગાઙ્કાયિતદન્તપઙ્ક્તિઃ ।
ગુહસ્ય નઃ પાતુ વિલોલદૃષ્ટિઃ યેનાવૃતં ખં ચ દિવં મહીં ચ ॥ ૧૦॥

કરીન્દ્રશુણ્ડાયિતદોઃપ્રકાણ્ડ દ્વિષટ્કકેયૂરવિરાજમાનમ્ ।
ગુહં મૃડાનીભવમપ્રમેયં ન ચક્ષુષા પશ્યતિ કશ્ચનૈનમ્ ॥ ૧૧॥

સ્વકીયદોર્દણ્ડગૃહીતચણ્ડકોદણ્ડનિર્મુક્તપૃષત્કષણ્ડૈઃ ।
ત્રિવિષ્ટપાન્ધઙ્કરણૈરશૂન્યાન્ યઃ સપ્તલોકાનકૃણોદ્દિશશ્ચ ॥ ૧૨॥

સૌવર્ણહારાદિવિભૂષણોજ્જ્વલન્મણિપ્રભાલીઢ વિશાલવક્ષાઃ ।
સ્કન્દઃ સ માં પાતુ જિતાબ્જયોનિઃ અજાયમાનો બહુધા વિજાયતે ॥ ૧૩॥

દેવસ્સ વૈહારિકવેષધારી લીલાકૃતાશેષજગદ્વિમર્દઃ ।
શિખિધ્વજઃ પાતુ ભયઙ્કરેભ્યો યઃ સપ્તસિન્ધૂનદધાત્પૃથિવ્યામ્ ॥ ૧૪॥

ષડાનનો દ્વાદશબાહુદણ્ડઃ શ્રુત્યન્તગામી દ્વિષડીક્ષણાઢ્યઃ ।
ભીતાય મહ્યં ગિરિજાતનૂજો હિરણ્યવર્ણસ્ત્વભયં કૃણોતુ ॥ ૧૫॥

યો દાનવાનીકભયઙ્કરાટવી સમૂલકોત્પાટનચણ્ડવાતઃ ।
ષાણ્માતુરઃ સંહૃત સર્વશત્રુઃ અથૈકરાજો હ્યભવજ્જનાનામ્ ॥ ૧૬॥

અતીવ બાલઃ પ્રવયાઃ  કુમારો વર્ણી યુવા ષણ્મુખ એકવક્ત્રઃ ।
ઇત્થં મહસ્તદ્બહુધાઽઽવિરાસીદ્યદેકમવ્યક્તમનન્તરૂપમ્ ॥ ૧૭॥

યદીયમાયાઽઽવરણાખ્યશક્તિ તિરોહિતાન્તઃ કરણા હિ મૂઢાઃ ।
ન જાનતે ત્વાં ગુહ તં પ્રપદ્યે પરેણ નાકં નિહિતં ગુહાયામ્ ॥ ૧૮॥

ગુરૂપદેશાધિગતેન યોગમાર્ગેણ સંપ્રાપ્ય ચ યોગિનસ્ત્વામ્ ।
ગુહં પરં બ્રહ્મ હૃદમ્બુજસ્થં વિભ્રાજદેતદ્યતયો વિશન્તિ ॥ ૧૯॥

યો દેવસેનાપતિરાદરાદ્વૈ બ્રહ્માદિભિર્દેવગણૈરભિષ્ટુતઃ ।
તં દેવસેનાન્યમહં પ્રપદ્યે વિશ્વં પુરાણં તમસઃ પરસ્તાત્ ॥ ૨૦॥

હૃદમ્બુજાન્તર્દહરાગ્રવર્તિ કૃશાનુમધ્યસ્થપરાત્મરૂપાત્ ।
ગુહાત્સુસૂક્ષ્માન્મુનયઃ પ્રતીયુરતઃ પરં નાન્યદણીયસં હિ ॥ ૨૧॥

તપઃ પ્રસન્નેશબહુપ્રદત્તવરપ્રમત્તાસુરભીતિભાજામ્ ।
સુપર્વણાં સ્કન્દ ભવાન્ શરણ્યઃ ઇન્દ્રસ્ય વિષ્ણોર્વરુણસ્ય રાજ્ઞઃ ॥ ૨૨॥

સ એવ દેવો ગિરિજાકુમારો રાજા સ મિત્રં સ હિ નો વરેણ્યઃ ।
ભ્રાતા સ બન્ધુઃ સ ગુરુઃ સ્વસા ચ સ એવ પુત્રઃ સ પિતા ચ માતા ॥ ૨૩॥

સ્વરાજ્યદાત્રે સ્વસુતાં વિતીર્ય તાં દેવસેનાં સુકુમારગાત્રામ્ ।
આરાધયત્યન્વહમામ્બિકેયં ઇન્દ્રો હવિષ્માન્સગણો મરુદ્ભિઃ ॥ ૨૪॥

દેવેન યેનાલઘુવિક્રમેણ હતેષુ સર્વેષ્વપિ દાનવેષુ ।
પુરેવ દેવાઃ સ્વપદેઽધિચક્રુઃ ઇન્દ્રશ્ચ સમ્રાડ્ વરુણશ્ચ રાજા ॥ ૨૫॥

ષાણ્માતુરોઽસૌ જગતાં શરણ્યસ્તેજોઽન્નમાપઃ પવનશ્ચ ભૂત્વા ।
ભૂસંરક્ષણાયૈવ જગત્સુ દેવો વિવેશ ભૂતાનિ ચરાચરાણિ ॥ ૨૬॥

કરૌ યુવામઞ્જલિમેવ નિત્યં ઉમાઙ્ગજાતાય વિધત્તમસ્મૈ ।
એષ પ્રસન્નઃ સુકુમારમૂર્તિરસ્માસુ દેવો દ્રવિણં દધાતુ ॥ ૨૭॥

નિધિઃ કલાનામુદધિર્દયાનાં પતિર્જનાનાં સરણિર્મુનીનામ્ ।
કદા પ્રસીદેન્મયિ પાર્વતેયઃ પિતા વિરાજામૃષભો રયીણામ્ ॥ ૨૮॥

સૌન્દર્યવલ્લીતનુસૌકુમાર્યસરોજપુષ્પન્ધયમાનસો યઃ ।
ચચાર કાન્તારપથેષુ દેવઃ સ નો દદાતુ દ્રવિણં સુવીર્યમ્ ॥ ૨૯॥

ઇતોઽપિ સૌન્દર્યવદસ્તુ દેહમિતીવ હુત્વા શિવભાલનેત્રે ।
જાતસ્તતઃ કિં સ કુમાર એવ કામસ્તદગ્રે સમવર્તતાધિ ॥ ૩૦॥

મુમુક્ષુલોકાઃ શ‍ૃણુત પ્રિયં વો ભજધ્વમેનં ગિરિજાકુમારમ્ ।
અસ્યૈવ દેવસ્ય પરાત્મતેતિ હૃદિ પ્રતીષ્ય્યા કવયો મનીષા ॥ ૩૧॥

ધેનુર્બહ્વીઃકામદોગ્ધ્રીઃ સુવત્સાઃ
કુણ્ડોધ્નીર્ગા દેહિ નસ્ત્વં સહસ્રમ્ ।
ભક્તાર્તિઘ્નં દેવદેવં ષડાસ્યં
વિદ્માહિ ત્વા ગોપતિં શૂરગોનામ્ ॥ ૩૨॥

વન્દામહે બર્હિણવાહનસ્થિતં વનીપકાશેષમનીષિતપ્રદમ્ ।
તોષ્ટૂયમાનં બહુધા પદે પદે સઙ્ક્રન્દનેનાનિમિષેણ જિષ્ણુના ॥ ૩૩॥

દિગ્ભ્યો દશભ્યઃ પરિતઃ પુનઃ પુનઃ
પરશ્શતાયાતસિષેવિષાવતામ્ ।
અનુગ્રહાયૈવ ષડાનનો હ્યસૌ
પ્રત્યઙ્ગ્મુખસ્તિષ્ઠતિ વિશ્વતોમુખઃ ॥ ૩૪॥

કૂર્મઃ ફણીન્દ્રશ્ચ તથા ફણાભૃતો
દિગ્દન્તિનશ્ચૈવ કુલાચલા અપિ ।
ભૂત્વાઽમ્બિકેયઃ પ્રથિતઃ પ્રતાપવાન્
બ્રહ્માધ્યતિષ્ઠત્ ભુવનાનિ ધારયન્ ॥ ૩૫॥

યો વૈ સ્કન્દઃ પૃષ્ટઃ શમ્ભોઃ સત્યં જ્ઞાનં બ્રહ્માદ્વૈતમ્ ।
ઓઙ્કારાર્થં પ્રાહ સ્મેત્થં સુબ્રહ્મણ્યોં સુબ્રહ્મણ્યોમ્ ॥ ૩૬॥

યો જાહ્નવીશરારણ્યહ્રદામ્ભોજે બભૌ પુરા ।
તસ્મૈ નમઃ ષણ્મુખાય મહાસેનાય ધીમહિ ॥ ૩૭॥

યદ્દક્ષિણકરામ્ભોજમિષ્ટદં સ્વાનુજીવિનામ્ ।
તેભ્ય ઇન્દ્રાદિસેનાનાં સેનાનિભ્યશ્ચ વો નમઃ ॥ ૩૮॥

દેવતાનામૃષીણાં ચ ભક્તાનામપિ યોગિનામ્ ।
ભૂતાનામપિ વીરાણાં પતીનાં પતયે નમઃ ॥ ૩૯॥

નમસ્તેઽસ્તુ મહેશાન ભીતેભ્યઃ શૂરપદ્મનઃ ।
સુનાસીરમુખેભ્યસ્ત્વં સ્વસ્તિદા અભયઙ્કરઃ ॥ ૪૦॥

કટાક્ષવીક્ષણાપાસ્ત નિખિલવ્યાધિબન્ધન ।
દેવસેનાપતે સ્વામિન્ અભિ ત્વા શૂર નૂનુમઃ ॥ ૪૧॥

અન્તશ્ચરસિ ભૂતેષુ ત્વમેકઃ સૂક્ષ્મરૂપતઃ ।
ત્વમેવ નિગમાન્તેષુ પરમાત્મા વ્યવસ્થિતઃ ॥ ૪૨॥

મહી દ્યૌરન્તરિક્ષં ચ વાયુરાપોઽનલોઽમ્બરમ્ ।
સુબ્રહ્મણ્ય જગન્નાથ ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૪૩॥

શૈશવે ત્વં મહાસેન બન્દીકૃત્ય પ્રજાપતિમ્ ।
અસ્રાક્ષીસ્તાન્યથાપૂર્વં મનુષ્યાઃ પશવશ્ચ યે ॥ ૪૪॥

વેદાન્તકન્દરીવર્તિ ગુહાશયષડાનને ।
ત્રિલોકીયં ત્વયિ વિભો નાવીવાન્તઃ સમાહિતા ॥ ૪૫॥

કલા મુહૂર્તાઃ કાષ્ઠાશ્ચ માસા વર્ષા યુગાનિ ચ ।
ત્વયિ વલ્લીશ નિહિતા નિમેષાસ્ત્રુટિભિઃ સહ ॥ ૪૬॥

રોગકાન્તારદાવાગ્ને મૃત્યુકક્ષહુતાશન ।
શૂરઘ્ન ત્વત્પ્રતાપેન રેજતે રોદસી ઉભે ॥ ૪૭॥

પરં બ્રહ્મ વિચિન્વન્તો હૃદયામ્ભોજમધ્યગમ્ ।
યોગિનો નારદાદ્યાસ્ત્વાં સદા પશ્યન્તિ સૂરયઃ ॥ ૪૮॥

હતશૂરમુખાશેષદૈતેયં ત્વાં ગુહાસ્તુવન્ ।
અગ્નાવિષ્ણૂ ચેન્દ્રવાયૂ સોમો ધાતા બૃહસ્પતિઃ ॥ ૪૯॥

વાચાલયસ્યવાચં ત્વં સચક્ષુઃ કુરુષેઽદૃશમ્ ।

આશ્રિતેભ્યો જગન્નાથ શિવો નઃ સુમના ભવ ॥ ૫૦॥

સ એવ જગતઃ કર્તા ભર્તા હર્તા જગદ્ગુરુઃ ।
કુમારઃ સચ્ચિદાનન્દઃ સોઽક્ષરઃ પરમઃ સ્વરાટ્ ॥ ૫૧॥

અસુરાન્ શૂરપદ્માદીન્ હત્વા શરવણોદ્ભવઃ ।
દેવાન્ સ્વસ્વપદે કૃત્વા સમ્રાડેકો વિરાજસિ ॥ ૫૨॥

તવ દૃષ્ટ્વા વિશ્વરૂપં સહર્ષભયવેપથુ ।
ત્વામસ્તુવન્નાદિતેયાઃ બૃહસ્પતિપુરોહિતાઃ ॥ ૫૩॥

કિન્નરા ગરુડા નાગા યક્ષાઃ સાધ્યા મરુદ્ગણાઃ ।
ઐન્દ્રીશં ત્વામહરહઃ વિશ્વે દેવા ઉપાસતે ॥ ૫૪॥

વિશ્વાસાન્માનુષીણાં ચ પ્રજાનાં પશુપક્ષિણામ્ ।
ચરાચરાણાં જગતાં ધ્રુવો રાજા વિશામયમ્ ॥ ૫૫॥

અમ્ભોજસંવર્તિકાસુ રાજહંસા ઇવ પ્રભો ।
મદીયહૃદયામ્ભોજે ધ્રુવસ્તિષ્ઠાવિચાચલિઃ ॥ ૫૬॥

લીલામાત્રકૃતાશેષભુવનાદ્ ગિરિજાસુતાત્ ।
અથર્વ ચાથ ઋક્સામ યજુસ્તસ્માદજાયત ॥ ૫૭॥

તિલે તૈલમિવ પ્રોતં દધ્નાજ્યમિવ ષણ્મુખે ।
મણૌ સૂત્રમિવ સ્યૂતં બ્રહ્મ વિશ્વમિદં જગત્ ॥ ૫૮॥

યસ્તપ્તાદીનૃષીન્ શાપાદુદ્ધાર હરાત્મજઃ ।
માતુઃ સ્તનસુધાપૂરે પુત્રઃ પ્રમુદિતો ધયન્ ॥ ૫૯॥

ઇજ્યયા પૂજયા સ્તુત્યા ભક્ત્યા ચ પરિચર્યયા ।
ધ્યાનેન તપસા ચ ત્વાં દેવં મનસિ ઈડતે ॥ ૬૦॥

શ્રુતિસ્મૃત્યાગમાદ્યુક્તકર્મણાં ફલદાયિને ।
સ્કન્દાય તુભ્યં મખિભિઃ શ્રદ્ધયા હૂયતે હવિઃ ॥ ૬૧॥

મૂર્ધા દ્યૌરમ્બરં નાભિરૂરૂ ભૂરતલં પદે ।
ષણ્મુખસ્યેત્યેવમાહુઃ અન્તર્વિશ્વમિદં જગત્ ॥ ૬૨॥

ભક્તસન્તાપશમન પ્રાવૃષેણ્યઘનાઘનાત્ ।
સ્કન્દાદન્યં મનો માગાઃ સ દૃષ્ટો મૃડયાતિ નઃ ॥ ૬૩॥

જિહ્વે ત્વમુચ્ચૈર્નિસ્તન્દ્રા રાત્રિન્દિવમભિષ્ટુહિ ।
દેવસેનં મહાસેનં અદુગ્ધા ઇવ ધેનવઃ ॥ ૬૪॥

અકલઙ્કશરચ્ચન્દ્રવિલસત્ત્વન્મુખસ્રુતાઃ ।
મન્દસ્મિતસુધાધારાસ્તા મે કૃણ્વન્તુ ભેષજમ્ ॥ ૬૫॥

દેવાનીજિમહે પૂર્વં તપશ્ચકૃમહે પુરા ।
યદ્ગુહો દેવતાસ્માકં કવિર્ગૃહપતિર્યુવા ॥ ૬૬॥

મદીયહૃદયામ્ભોજનિર્યૂહમણિમઞ્ચકે ।
ષડાનન ત્વત્પાદઃ સ્યાદિયાન્ પ્રાદેશસમ્મિતઃ ॥ ૬૭॥

ચિરન્તનવચઃ સ્તુત્યઃ પ્રણવામ્બુજષટ્પદઃ ।
કરોતુ દેવસેનેશઃ શિવા નઃ પ્રદિશો દિશઃ ॥ ૬૮॥

દૈતેયવધસન્નદ્ધો ભવાન્ પવનસારથિઃ ।
દ્વિલક્ષમર્વતો હૈમે રથે યુક્ત્વાઽધિતષ્ઠતિ ॥ ૬૯॥

ગગનોચ્છ્રિતકોદણ્ડકિરીટં શૂરમાહવે ।
બિભેદિથ ત્વં નારાચૈઃ સહસ્રેણ શતેન ચ ॥ ૭૦॥

ઐશાલ્લલાટનયનાત્ જાતં વહ્નિર્યથાઽરણેઃ ।
મુમુક્ષવો ગુહં બ્રહ્મ વિચિન્વન્તુ મનીષયા ॥ ૭૧॥

હિરણ્યજ્યોતિષં સ્કન્દં યાચધ્વં ભો વનીપકાઃ ।
એષોઽર્થિનઃ પૂરયતિ પ્રજયા ચ ધનેન ચ ॥ ૭૨॥

સન્નિધાસ્યતિ કિં સ્વામી ભવનામ્બુરુહેક્ષણઃ ।
તાવકં મઞ્જુલં રૂપં સ્મર્યતે ચ ન દૃશ્યતે ॥ ૭૩॥

યતસ્ત્વં જગતામેષાં આશિષે શિખિવાહન ।
તતો દેહિ બહૂન્વ્રીહીન્ અકૃષ્ટા યે ચ કૃષ્ટજાઃ ॥ ૭૪॥

ધનધાન્યગૃહાન્ પુત્રાન્ દેહિ દેવ દયાનિધે ।
ત્વમાશ્રિતેષ્ટદ ઇતિ કર્ણાભ્યાં ભૂરિ વિશ્રુતમ્ ॥ ૭૫॥

ભક્તેભ્યો મુચુકુન્દાખ્યપ્રમુખેભ્યો યથા ગુહ ।
પ્રાદાસ્તથા દેહિ મહામચ્યુતાં બહુલાં શ્રિયમ્ ॥ ૭૬॥

ભક્તાન્ તત્પુત્રસુહૃદઃ તન્માતૃપિતૃસોદરાન્ ।
પાહિ સ્કન્દ પુનશ્ચાસ્ય દ્વિપદો યે ચતુષ્પદઃ ॥ ૭૭॥

ચોરવ્યાઘ્રપિશાચાખુસર્પકીટાદિબાધકાત્ ।
ભક્તાન્નિશાસુ સંરક્ષન્ ત્રિષુ લોકેષુ જાગૃહિ ॥ ૭૮॥

દાનવેષ્વપિ દૈત્યેષુ રાક્ષસેષ્વપ્યરાતિષુ ।
પિશાચેષ્વપિ ગાઙ્ગેય વિક્રમસ્વ મહાનસિ ॥ ૭૯॥

આધિભિર્વ્યાધિભિશ્ચૈવ પીડિતાનામહર્નિશમ્ ।
દૂતાનાં વપુષિ સ્વામિન્ આસુવોર્જમિષં ચ નઃ ॥ ૮૦॥

અતિતીવ્રેણ તપસા તપ્યમાના અહર્નિશમ્ ।
ઉપાસત ત્વાં તપ્તાધાઃ અથ હૈનં પુરર્ષયઃ ॥ ૮૧॥

ધ્યાનાવાહનપૂજેજ્યાપરિચર્યાસ્તુતિષ્વહમ્ ।
અજ્ઞો મે સફલાં પૂજાં કૃણુહિ બ્રહ્મણસ્પતે ॥ ૮૨॥

અસુરાન્ રાક્ષસાન્ ક્રૂરાન્ દેવયજ્ઞવિઘાતકાન્ ।
જહિ દેવેશ યસ્માત્ત્વં રક્ષોહામીવચાતનઃ ॥ ૮૩॥

દુર્વૃત્તેભ્યો ધનં ધત્સે નીચેભ્યોઽપિ ધનં બહુ ।
ન દદાસિ કુતો મહ્યં એતત્પૃચ્છામિ સંપ્રતિ ॥ ૮૪॥

મુખૈરેતાન્મહારૌદ્રાન્ દૂરીકુરુ જગત્પતે ।
મમ સ્વમભિકાઙ્ક્ષન્તે યે સ્તેના યે ચ તસ્કરાઃ ॥ ૮૫॥

ગુહ ત્વત્પાદભક્તાનાં ગેહે જાગ્રત્વહર્દિવમ્ ।
વીરબાહુમુખા વીર તે નિત્યાનુચરાસ્તવ ॥ ૮૬॥

ત્રિષડ્વિલોચનેષ્વેકદૃક્કટાક્ષેણ લક્ષયન્ ।
આઢ્યં કરોતુ માં સ્કન્દઃ પર્જન્યો વૃષ્ટિમાનિવ ॥ ૮૭॥

ભયાનકાસુરાનીકકાન્દિશીકાઃ પુરા ખલુ ।
ગુહ ત્વાં શરણં પ્રાપુઃ ઇન્દ્રેણ સહ દેવતાઃ ॥ ૮૮॥

ત્વામેવ કીર્તયન્દેવ ધ્યાયન્શ ૃણ્વન્ પ્રપૂજયન્ ।
ગુહ ત્વત્પાદભક્તોઽહં જીવાનિ શરદઃ શતમ્ ॥ ૮૯॥

કૃપાદુગ્ધાબ્ધિકલ્લોલાયમાનાપાઙ્ગવીક્ષણ ।
દેહિ મે ગુહ બહ્વાયુર્દીર્ઘાયુસ્ત્વમિહેશિષે ॥ ૯૦॥

પુરારાતીક્ષણપયઃ પારાવારસુધાકર ।

ષડ્વક્ત્ર ધેહિ કૃપયા મયિ મેધાં મયિ પ્રજામ્ ॥ ૯૧॥

ભક્તચાતકવૃન્દેષ્ટવર્ષિધારાધર પ્રભો ।
અસ્માન્ સઞ્જીવય સ્વામિન્ અસ્મિન્ લોકે શતં સમાઃ ॥ ૯૨॥

ભીતા વયં મહાસેન પથિ દુર્ગે વને યતઃ ।
ચોરવ્યાઘ્રપિશાચેભ્યઃ તતો નો અભયં કૃધિ ॥ ૯૩॥

વ્યાધયઃ શૂલકુષ્ઠાર્શઃ પ્રમેહાદ્યા યતઃ સદા ।
પીડયન્તિ પિશાચાદ્યાઃ તતો નો ધેહિ ભેષજમ્ ॥ ૯૪॥

ત્વદીયપાદકમલધ્યાનવર્મિતવિગ્રહાન્ ।
કુહકા મોહકાઃ ક્ષુદ્રાઃ માઽસ્માન્પ્રાપન્નરાતયઃ ॥ ૯૫॥

ધનધાન્યપશુક્ષેત્રબલેષ્વસ્મદપેક્ષયા ।
દેવસેનાપતેઽસ્માકં અધરે સન્તુ શત્રવઃ ॥ ૯૬॥

અરાતિકુલનિર્મૂલનાલઙ્કર્મીણવિક્રમ ।
અકારણેન બહુધા યો નો દ્વેષ્ટિ સ રિષ્યતુ ॥ ૯૭॥

મન્ત્રૈર્યન્ત્રૈસ્તથા તન્ત્રૈઃ ઔષધૈરાયુધૈરપિ ।
જિઘાંસતિ ચ યોઽસ્માન્ સ દ્વિષન્મે બહુ શોચતુ ॥ ૯૮॥

આખણ્ડલારીનસુરાન્ ત્વં તુ સ્પર્ધાવતો યથા ।
જહિ ગાઙ્ગેય તૌ મર્ત્યૌ યં ચાહં દ્વેષ્ટિ યશ્ચ મામ્ ॥ ૯૯॥

ત્વન્નામકીર્તનપરક્ષેમઙ્કરકરામ્બુજ ।
તમિમં સંહર સ્વામિન્ યશ્ચ નો દ્વેષતે જનઃ ॥ ૧૦૦॥

દૂરેઽન્તિકે વા યઃ શત્રુઃ અસ્માનનપરાધિનઃ ।
શપત્યેનં જહિ સ્કન્દ યશ્ચ નો  શપતઃ શપાત્ ॥ ૧૦૧॥

ચક્ષુષા મનસા વાચા મન્ત્રેણ હવનેન ચ ।
તત્કૃત્યાં નાશય સ્વામિન્ ભ્રાતૃવ્યસ્યાભિદાસતઃ ॥ ૧૦૨॥

મચ્છિદ્રાન્વેષિણઃ શત્રોઃ ધનમાયુઃ પ્રજાઃ પશૂન્ ।
સર્વાન્નાશય શૂરઘ્ન મા તસ્યોચ્છેષિ કિઞ્ચન ॥ ૧૦૩॥

અવિદ્વાંસશ્ચ વિદ્વાંસઃ સ્વપ્ને જાગ્રતિ વા ગુહ ।
તેભ્યો મોચય માં યદ્યદેનાંસિ ચકૃમા વયમ્ ॥ ૧૦૪॥

વયમૂચિમ યદ્દેવ જિહ્વયા દેવહેલનમ્ ।
એનસો મોચયાગ્નેય ત્વં હિ વેત્થ યથાતથમ્ ॥ ૧૦૫॥

વિત્તાર્થં વા તથાઽન્યાર્થં વિપ્રાર્થં ગોઽર્થમેવ વા ।
પુનીહ્યસ્માંસ્તતઃ સ્કન્દ યત્કિઞ્ચાનૃતમૂદિમ ॥ ૧૦૬॥

તમાગસં ક્ષમસ્વ ત્વં સ્વકીયાભીષ્ટલિપ્સયા ।
સંપ્રાર્થ્ય તુભ્યં વાઽન્યસ્મૈ યદ્વાચાઽનૃતમૂદિમ ॥ ૧૦૭॥

સૌન્દર્યવલ્લ્યા સહિતં અમ્બયા દેવસેનયા ।
મહાસેનં ભજે દેવં સત્યેન તપસા સહ ॥ ૧૦૮॥

યો વૈ પઠેદ્દ્રુહસ્યૈનં વેદાન્તસ્તવમાદરાત્ ।
સ્કાન્દાઃ કટાક્ષાસ્તસ્યોચ્ચૈરાયુઃ કીર્તિં પ્રજાં દદુઃ ॥ ૧૦૯॥

સ્કન્દસ્યૈનં વેદપાદસ્તવં યો
ભક્ત્યા નિત્યં શ્રાવયેદ્વા પઠેદ્વા ।
ભૂયાસુસ્તે તસ્ય મર્ત્યસ્ય શીઘ્રં
યે યે કામા દુર્લભા મર્ત્યલોકે ॥ ૧૧૦॥

ઇતિ સ્કાન્દપુરાણાન્તર્ગતઃ સ્કન્દવેદપાદસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com
and PSA Easwaran

*Skanda Veda Pada Stavah*
pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*